श्री बगळामुखी कवचं

श्री बगळामुखी कवचं

कैलासाचलमध्यगं पुरवहं शांतं त्रिनेत्रं शिवं
वामस्था कवचं प्रणम्य गिरिजा भूतिप्रदं पृच्छति |
देवी श्रीबगलामुखी रिपुकुलारण्याग्निरूपा च या
तस्याश्चापविमुक्त मंत्रसहितं प्रीत्याऽधुना ब्रूहि मां || 1 ||

श्रीशंकर उवाच |
देवी श्रीभववल्लभे शृणु महामंत्रं विभूतिप्रदं
देव्या वर्मयुतं समस्तसुखदं साम्राज्यदं मुक्तिदं |
तारं रुद्रवधूं विरिंचिमहिला विष्णुप्रिया कामयु-
-क्कांते श्रीबगलानने मम रिपून्नाशाय युग्मंत्विति || 2 ||

ऐश्वर्याणि पदं च देहि युगलं शीघ्रं मनोवांछितं
कार्यं साधय युग्मयुक्छिववधू वह्निप्रियांतो मनुः |
कंसारेस्तनयं च बीजमपराशक्तिश्च वाणी तथा
कीलं श्रीमिति भैरवर्षिसहितं छंदो विराट् संयुतं || 3 ||

स्वेष्टार्थस्य परस्य वेत्ति नितरां कार्यस्य संप्राप्तये
नानासाध्यमहागदस्य नियतन्नाशाय वीर्याप्तये |
ध्यात्वा श्रीबगलाननामनुवरं जप्त्वा सहस्राख्यकं
दीर्घैः षट्कयुतैश्च रुद्रमहिलाबीजैर्विन्यास्यांगके || 4 ||

ध्यानं |
सौवर्णासनसंस्थितां त्रिनयनां पीतांशुकोलासिनीं
हेमाभांगरुचिं शशांकमुकुटां स्रक्चंपकस्रग्युतां |
हस्तैर्मद्गरपाशबद्धरसनां संबिभ्रतीं भूषण-
-व्याप्तांगीं बगलामुखीं त्रिजगतां संस्तंभिनीं चिंतये || 5 ||

विनियोगः |
ॐ अस्य श्रीबगलामुखी ब्रह्मास्त्रमंत्र कवचस्य भैरव ऋषिः विराट् छंदः श्रीबगळामुखी देवता क्लीं बीजं ऐं शक्तिः श्रीं कीलकं मम परस्य च मनोभिलषितेष्टकार्यसिद्धये विनियोगः |

ऋष्यादिन्यासः |

भैरव ऋषये नमः शिरसि |

विराट् छंदसे नमः मुखे |

श्री बगलामुखी देवतायै नमः हृदि |

क्लीं बीजाय नमः गुह्ये |

ऐं शक्तये नमः पादयोः |

श्रीं कीलकाय नमः सर्वांगे |

करन्यासः |

ॐ ह्रां अंगुष्ठाभ्यां नमः |

ॐ ह्रीं तर्जनीभ्यां नमः |

ॐ ह्रूं मध्यमाभ्यां नमः |

ॐ ह्रैं अनामिकाभ्यां नमः |

ॐ ह्रौं कनिष्ठिकाभ्यां नमः |

ॐ ह्रः करतलकरपृष्ठाभ्यां नमः |

अंगन्यासः |

ॐ ह्रां हृदयाय नमः |

ॐ ह्रीं शिरसे स्वाहा |

ॐ ह्रूं शिखायै वषट् |

ॐ ह्रैं कवचाय हुं |

ॐ ह्रौं नेत्रत्रयाय वौषट् |

ॐ ह्रः अस्त्राय फट् |

भूर्भुवस्सुवरोमिति दिग्बंधः |

मंत्रोद्धारः |

ॐ ह्रीं ऐं श्रीं क्लीं श्रीबगलानने मम रिपून्नाशय नाशय ममैश्वर्याणि देहि देहि शीघ्रं मनोवांछितकार्यं साधयः साधयः ह्रीं स्वाहा |

कवचं |

शिरो मे पातु ॐ ह्रीं ऐं श्रीं क्लीं पातु ललाटकं |

संबोधनपदं पातु नेत्रे श्रीबगलानने || 1 ||

श्रुतौ मम रिपुं पातु नासिकान्नाशय द्वयं |
पातु गंडौ सदा मामैश्वर्याण्यं तं तु मस्तकं || 2 ||

देहि द्वंद्वं सदा जिह्वां पातु शीघ्रं वचो मम |
कंठदेशं मनः पातु वांछितं बाहुमूलकं || 3 ||

कार्यं साधय द्वंद्वंतु करौ पातु सदा मम |
मायायुक्ता तथा स्वाहा हृदयं पातु सर्वदा || 4 ||

अष्टाधिकचत्वारिंशद्दंडाढ्या बगलामुखी |
रक्षां करोतु सर्वत्र गृहेऽरण्ये सदा मम || 5 ||

ब्रह्मास्त्राख्यो मनुः पातु सर्वांगे सर्वसंधिषु |
मंत्रराजः सदा रक्षां करोतु मम सर्वदा || 6 ||

ॐ ह्रीं पातु नाभिदेशं कटिं मे बगलाऽवतु |
मुखी वर्णद्वयं पातु लिंगं मे मुष्कयुग्मकं || 7 ||

जानुनी सर्वदुष्टानां पातु मे वर्णपंचकं |
वाचं मुखं तथा पदं षड्वर्णा परमेश्वरी || 8 ||

जंघायुग्मे सदा पातु बगला रिपुमोहिनी |
स्तंभयेति पदं पृष्ठं पातु वर्णत्रयं मम || 9 ||

जिह्वां वर्णद्वयं पातु गुल्फौ मे कीलयेति च |
पादोर्ध्वं सर्वदा पातु बुद्धिं पादतले मम || 10 ||

विनाशय पदं पातु पादांगुल्योर्नखानि मे |
ह्रीं बीजं सर्वदा पातु बुद्धींद्रियवचांसि मे || 11 ||

सर्वांगं प्रणवः पातु स्वाहा रोमाणि मेऽवतु |
ब्राह्मी पूर्वदले पातु चाग्नेयां विष्णुवल्लभा || 12 ||

माहेशी दक्षिणे पातु चामुंडा राक्षसेऽवतु |
कौमारी पश्चिमे पातु वायव्ये चापराजिता || 13 ||

वाराही चोत्तरे पातु नारसिंही शिवेऽवतु |
ऊर्ध्वं पातु महालक्ष्मीः पाताले शारदाऽवतु || 14 ||

इत्यष्टौ शक्तयः पांतु सायुधाश्च सवाहनाः |
राजद्वारे महादुर्गे पातु मां गणनायकः || 15 ||

श्मशाने जलमध्ये च भैरवश्च सदाऽवतु |
द्विभुजा रक्तवसनाः सर्वाभरणभूषिताः || 16 ||

योगिन्यः सर्वदा पातु महारण्ये सदा मम |
इति ते कथितं देवि कवचं परमाद्भुतं || 17 ||

श्रीविश्वविजयन्नाम कीर्तिश्रीविजयप्रदं |
अपुत्रो लभते पुत्रं धीरं शूरं शतायुषं || 18 ||

निर्धनो धनमाप्नोति कवचस्यास्य पाठतः |
जपित्वा मंत्रराजं तु ध्यात्वा श्रीबगलामुखीं || 19 ||

पठेदिदं हि कवचं निशायां नियमात्तु यः |
यद्यत्कामयते कामं साध्यासाध्ये महीतले || 20 ||

तत्तत्काममवाप्नोति सप्तरात्रेण शंकरी |
गुरुं ध्यात्वा सुरां पीत्वा रात्रौ शक्तिसमन्वितः || 21 ||

कवचं यः पठेद्देवि तस्याऽसाध्यं न किंचन |
यं ध्यात्वा प्रजपेन्मंत्रं सहस्रं कवचं पठेत् || 22 ||

त्रिरात्रेण वशं याति मृत्युं तं नात्र संशयः |
लिखित्वा प्रतिमां शत्रोः सतालेन हरिद्रया || 23 ||

लिखित्वा ह्यदि तं नाम तं ध्यात्वा प्रजपेन्मनुं |
एकविंशद्दिनं यावत्प्रत्यहं च सहस्रकं || 24 ||

जप्त्वा पठेत्तु कवचं चतुर्विंशतिवारकं |
संस्तंभं जायते शत्रोर्नात्र कार्या विचारणा || 25 ||

विवादे विजयं तस्य संग्रामे जयमाप्नुयात् |
श्मशाने च भयं नास्ति कवचस्य प्रभावतः || 26 ||

नवनीतं चाभिमंत्र्य स्त्रीणां दद्यान्महेश्वरि |
वंध्यायां जायते पुत्रो विद्याबलसमन्वितः || 27 ||

श्मशानांगारमादाय भौमे रात्रौ शनावथ |
पादोदकेन स्पृष्ट्वा च लिखेल्लोहशलाकया || 28 ||

भूमौ शत्रोः स्वरूपं च हृदि नाम समालिखेत् |
हस्तं तद्धृदये दत्वा कवचं तिथिवारकं || 29 ||

ध्यात्वा जपेन्मंत्रराजं नवरात्रं प्रयत्नतः |
म्रियते ज्वरदाहेन दशमेऽह्नि न संशयः || 30 ||

भूर्जपत्रेष्विदं स्तोत्रमष्टगंधेन संलिखेत् |
धारयेद्दक्षिणे बाहौ नारी वामभुजे तथा || 31 ||

संग्रामे जयमाप्नोति नारी पुत्रवती भवेत् |
ब्रह्मास्त्रादीनि शस्त्राणि नैव कृंतंति तं जनं || 32 ||

संपूज्य कवचं नित्यं पूजायाः फलमालभेत् |
बृहस्पतिसमो वापि विभवे धनदोपमः || 33 ||

कामतुल्यश्च नारीणां शत्रूणां च यमोपमः |
कवितालहरी तस्य भवेद्गंगाप्रवाहवत् || 34 ||

गद्यपद्यमयी वाणी भवेद्देवीप्रसादतः |
एकादशशतं यावत्पुरश्चरणमुच्यते || 35 ||

पुरश्चर्याविहीनं तु न चेदं फलदायकं |
न देयं परशिष्येभ्यो दुष्टेभ्यश्च विशेषतः || 36 ||

देयं शिष्याय भक्ताय पंचत्वं चाऽन्यथाप्नुयात् |
इदं कवचमज्ञात्वा भजेद्यो बगलामुखीं |
शतकोटि जपित्वा तु तस्य सिद्धिर्न जायते || 37 ||

दाराढ्यो मनुजोस्य लक्षजपतः प्राप्नोति सिद्धिं परां
विद्यां श्रीविजयं तथा सुनियतं धीरं च वीरं वरं |
ब्रह्मास्त्राख्यमनुं विलिख्य नितरां भूर्जेष्टगंधेन वै
धृत्वा राजपुरं व्रजंति खलु ये दासोऽस्ति तेषां नृपः || 38 ||

इति विश्वसारोद्धारतंत्रे पार्वतीश्वरसंवादे बगळामुखीकवचं संपूर्णं |